# Shri Kamakhya Kavacham 3

# શ્રીકામાખ્યાકવચમ્ ૩

## Document Information

Text title : kAmAkhyAkavacham 3

File name : kAmAkhyAkavacham3.itx

Category : devii, kAmAkShI, devI, kavacha

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : JUne 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2026

*sanskritdocuments.org*

# શ્રીકામાખ્યાકવચમ્ ૩

ઈશ્વર ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ કવચં સિદ્ધિદં શુભમ્ ।
કામાખ્યાયા મહાગુહ્યં સર્વરક્ષાકરં પરમ્ ॥ ૧॥

યસ્ય સ્મરણમાત્રેણ વિઘ્નજાલં પ્રણશ્યતિ ।
ભૂતપ્રેતપિશાચાદ્યા દૂરતો યાન્તિ સર્વદા ॥ ૨॥

ૐ કામાખ્યા મે શિરઃ પાતુ ત્રિપુરા લલિતાનના ।
ભ્રુવોર્મધ્યે તારા પાતુ નેત્રે નીલસરસ્વતી ॥ ૩॥

કર્ણૌ મે ભૈરવી પાતુ નાસિકાં બગલામુખી ।
મુખં માતઙ્ગિની પાતુ જિહ્વાં વાગીશ્વરી સદા ॥ ૪॥

દન્તાન્ મે કમલા પાતુ ચિબુકં ચણ્ડિકા શુભા ।
કણ્ઠં મે ત્રિપુરેશાની સ્કન્ધૌ દુર્ગા સદાવતુ ॥ ૫॥

બાહૂ મે ભુવનેશી ચ કરૌ કામપ્રદાયિની ।
અઙ્ગુલીઃ સિદ્ધિદા પાતુ નખાન્ નિત્યાઽવતુ પ્રભા ॥ ૬॥

વક્ષઃસ્થલં મહાલક્ષ્મીઃ હૃદયં પરમેશ્વરી ।
નાભિં મે યોનિરૂપા સા કુક્ષિં કામેશ્વરી તથા ॥ ૭॥

કટિં મે કામરૂપસ્થા ગુહ્યં ગુહ્યેશ્વરી તથા ।
ઊરૂ મે વિશ્વમાતા ચ જાનુની જગદમ્બિકા ॥ ૮॥

જઙ્ઘે જયપ્રદા પાતુ ગુલ્ફૌ મે સર્વમઙ્ગલા ।
પાદૌ પદ્માલયાપાતુ પાદાઙ્ગુલ્યઃ શિવા સદા ॥ ૯॥

પૂર્વે માં પાતુ કામાખ્યા આગ્નેય્યાં વહ્નિવલ્લભા ।
દક્ષિણે કાલિકા પાતુ નૈરૃત્યાં રક્તદન્તિકા ॥ ૧૦॥

પશ્ચિમે પાતુ મે તારા વાયવ્યે ભુવનેશ્વરી ।

ઉત્તરે શારદા પાતુ ઐશાન્યાં પરમેશ્વરી ॥ ૧૧॥

ઊર્ધ્વે માં પાતુ પરમા અધસ્તાદ્ યોનિમણ્ડલા ।
અન્તર્બોધસ્વરૂપા માં બહિર્માયા સદાવતુ ॥ ૧૨॥

જલે સ્થલે ચ ગગને સ્વપ્ને જાગરણે તથા ।
સઙ્ગ્રામે સઙ્કટે ઘોરે પાતુ માં કામરૂપિણી ॥ ૧૩॥

રાજદ્વારે શ્મશાને ચ વનદુર્ગે ગિરૌ તથા ।
નદીતીરે મહાઘોરે પાતુ માં કામસુન્દરી ॥ ૧૪॥

વિદ્યાયાં પાતુ મે વિદ્યા ધને લક્ષ્મીઃ સદાવતુ ।
ભક્તૌ મે ભાવિની પાતુ મોક્ષે માં પરદેવતા ॥ ૧૫॥

યોનિમુદ્રા મહાશક્તિઃ કુણ્ડલી પરરૂપિણી ।
ચિદાકાશે સદા પાતુ સ્વપ્રકાશસ્વરૂપિણી ॥ ૧૬॥

ન મન્ત્રં ન તપો દાનં ન તીર્થં ન ચ સાધનમ્ ।
સમં ભવતિ દેવેશિ કવચસ્યાસ્ય ધારણાત્ ॥ ૧૭॥

ભૂર્જપત્રે સમાલિખ્ય રક્તસૂત્રેણ વેષ્ટિતમ્ ।
ધારયેદ્ ભક્તિભાવેન સર્વસિદ્ધિં લભેન્નરઃ ॥ ૧૮॥

પઠેદ્યઃ પ્રાતરુત્થાય શુચિર્ભૂત્વા સમાહિતઃ ।
તસ્ય હસ્તે સદા સિદ્ધિઃ વક્ત્રે વાણી નિવર્તતે ॥ ૧૯॥

કામાખ્યા પરમાવિદ્યા કામાખ્યા પરમં તપઃ ।
કામાખ્યા પરમં બ્રહ્મ કામાખ્યા શરણં મમ ॥ ૨૦॥

॥ ઇતિ શ્રીકામાખ્યાકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Durga Sharma

*Shri Kamakhya Kavacham 3*

pdf was typeset on June 28, 2026

Please send corrections to *sanskrit@cheerful.com*